लौगाक्षिमुनिप्रकृतः-काश्मीरीयत्रैवर्णेयः

पण्डितकेशवभट्टज्योतिर्विदा

संस्कृतः-शोधितश्च

अयम्

नित्यकर्मविधिः ।

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयेऽङ्कयित्वा ।

श्रीसप्तर्षिसंवत्सरे ५००८ विक्रमवत्सरे १९८९

ईस्वीहायने १९३१.

परोपकाराय प्राकाश्यं नीतः ।

मूल्यं ≡) आनकत्रयम् ।

हमारे क्रेयपुस्तक मिलने का पत्ताः—

पं० केशवभट्ट ज्योतिषी पाठशाला टीचर, जिल्ला रैणावारी, महल्ला भाग ज्योगीलङ्कार कश्मीर—श्रीनगर.

क्रेयपुस्तकसूची	मूल्यम्
१ **नित्यकर्मविधिः नं. १** (स्नान-सन्ध्या-नैवेद्य-भोजन-पञ्चगव्यविधिः हिन्दीमें इतिकर्तव्यतासहितः) ब्राह्मी-विद्या च.	≡)
२ **नित्यकर्मविधिः नं. २** (नं १ के विषययुक्त तथा विष्णु-पञ्चायतनपूजा गणेशकवचगुरु-गायत्री-गौरीस्तुति-मुकुन्दमालासहितः)	।=)
३ **नित्यकर्मविधिः नं. ३** (नं. २ के विषय तथा शिक्षा जन्मोत्सव-जन्माष्टमीपूजा जयनारायण-व्याप्तचराचर-अतिभीषण बहुरूपगर्भपर्यायस्वच्छन्दध्यानात्मस्तुतिश्च)	।=)॥
४ **शिवपूजा** (बहुरूपगर्भ-महिम्नःपार-शिवकवच-शिवनिर्वाणव्याप्तचराचर—अतिभीषण-षडक्षर-पञ्चाक्षर-दीनाक्रन्द-शिवक्षमापन-कैवल्योपनिषत्-शिवपूजा-गणेशस्तवराजात्मकः ।)	।=)
५ **गणेशदुर्गास्तोत्रावली** (लाक्षासिन्दूर-अद्रिराजज्येष्ठपुत्र-एकदन्तमीशपुत्र इति गणेशस्तोत्रत्रय-गणपतिविद्या-देवीध्यानरत्नमाला-शारिकास्तोत्र ब्राह्मीविद्यात्मिका)	।-)
६ **सौन्दर्यलहरी पञ्चस्तवीसमेता**	।-)

नित्यकर्मविधिः ।

॥ अथ स्नानविधिः ॥

श्रीगणेशाय नमः । आयुर्बलं यशो वर्चः प्रजाधृति-[1] वसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥ यो[2] विश्वचक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् । संबाहुभ्यां धमते संपतत्रैर्द्यावापृथिवी जनयन्देव एकः ॥ नमोऽस्त्वऽनन्ताय[3] सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे । सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥ नमः[4] कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥ गङ्गाप्रयागगयनैमिषपुष्करादितीर्थानि यानि भुवि सन्ति हरिप्रसादात् । आयान्तु तानि करपद्मपुटे मदीये प्रक्षालयन्तु वदनस्य निशाकलङ्कम् ॥ तीर्थे स्नेयं[5]

---

१ दातन करना । २ हाथ धोना । ३ बाहे पैर धोना । ४ दाहे पैर धोना । ५ मुंह धोना ।

तीर्थमेव समानानां भवति । मा नः शंसो अरुरुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षाऽऽनो ब्रह्मणस्पते ॥ ओं[1]गायत्र्यै नमः ओं भूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ३ ॥ गायत्र्यैव शिखामाबध्य ॥([2]यज्ञोपवीतं परमं पवित्रं, प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं, यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि, यज्ञस्य त्वा, उपवीतेन उपनह्यामि)॥ [3]कृत्वाऽलं पादशौचं विमलमऽथ जलं त्रिः[4]पिबेदु[5]न्मृजेद्द्वि[6]स्तर्जन्यऽङ्गुष्ठकाभ्यां [7]सजलमऽभिमृशेन्नासिकारन्ध्रयुग्मम् । अङ्गुष्ठानामिकाभ्यां नयनयुगलकं कर्णयुग्मं कनिष्ठाङ्गुष्ठाभ्यां [8]नाभिदेशं

---

१ यज्ञसूत्र और शिखा भी दोना । २ यज्ञसूत्र गले में पाना । ३ अच्छीतरह पैर धोकर । ४ फिर सफा पानी । ५ तीन बार पीकर और दो बार बाहे तरफ सूंगलिकर छोडना । ६ बाहे हाथके बीच में रखे हुई पानी तर्जनी और अंगूठ से । ७ दानो नथनों को मलना चाहिये । ८ अंगूठ और अनामिका से दो आंखों को मलना । ९ कनिष्ठा और अंगूठ से दो कानों को । १० फिर नाभिस्थान और हृदय को हथेली से ।

हृदयमऽथ तलेनाऽङ्गुलीभिः[1] शिरोंसौ॥ प्राणायामः॥(ओं[2]भूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यं ओं-तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचो-दयात् ओं आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम्)॥ ब्रह्मणोऽस्यादयः[3] नमो अग्नये अप्सुषदे नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽपांपतये नमोऽद्भ्यः॥ अवभृथे[4] त्रिष्टुब्वरुणः। उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाउ। अपदे पादा प्रतिधातवे करुताप-वक्ता हृदयाविधश्चित्[5]॥ यमस्य राज्ञो जगती वरुणः।

---

१ सब अङ्गुलियों से सिर और कन्दों को मलना। २ इह मन्त्र एकबार पढते २ नाभिस्थान पर रक्तवर्ण ब्रह्मा के ध्यान समेत "पूरक" याने अंगूठ से दाहे नथन बान्ध के बाहे नथन से आहस्ता २ प्राण चडावना॥ और दो वार पढते २ हृदय पर कृष्णवर्ण विष्णु के ध्यान समेत "कुम्भक" याने अंगूठ से भाकय अङ्गुलियों से बाहे नथन भी बान्ध के प्राण बन्ध रखना॥ और तीन बार पढते २ माथे पर श्वेतवर्ण शिव के ध्यान समेत "रेचक" याने अंगूठ उठाकर दाहे नथन से शनैः २ प्राण छोडना॥ इह प्राणायाम की विधि है। ३ नमस्कार। ४ उपस्थान। ५ हाथों से पानी में तीनवार मण्डल करना।

ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो देवः सविता बृहस्पतिर्विश्वेदेवा मरुतो मुञ्चन्तु स्वर्काः ॥ निचाङ्कुणस्य[1] शुनःशेफस्य चापः । सुमित्रिया न आपः ओषधयो भवन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः ॥ यत्किंचेदं वरुण दैव्येजनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ते यत्तव धर्माय योऽपि म मा नस्तस्मादेनसो देव रीरिषः ॥ ओं[3]भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियोयोनः प्रचोदयात् । ३ । त्रितस्य[5] महापाङ्क्तिरादित्याः । आदित्या अव हिख्याता दिक्कूलाद्विस्पृशः सुतीर्थाः सर्वतो यथा । नुन्नोनेषया सुगमऽनेहसो वऊतयः सुऊतयो वऊतयः ॥ मेधातिथेर्गायत्रं विष्णुः । अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्तधामभिः ॥ भर्गस्य[6] बृहती

१ बाहे तरफ तीन जलाञ्जलि छोडना । २ नमस्कार । ३मिट्टीको तीन भाग करके पहलेभाग पर पानी अंगूठ से छोडना । ४ दूसरे भागपर । ५ तीसरे भागपर । ६ तीसरे भाग को और चार भाग करके, प्रथमभाग पूर्व से नदी में छोडना ।

इन्द्रः । यत इन्द्र भयामहे ततो नो अभयङ्कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्विद्विषो विमृधो जहि ॥ शांसि[1]स्याऽनुष्टुभो विमृध इन्द्रः । स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नः सोमपा अभयङ्करः ॥ विरक्षो[2] विमृधो जहि विवृत्रस्य हनूरुज । विमन्युमिन्द्र वृत्रहन्नऽमित्रस्याभिदासतः ॥ वसु[3]क्रस्य त्रिष्टुबिन्द्रः । इदं सुमे जरितरः चिकिद्धि प्रतीपं शापं नद्यो वहन्ति लोपाशाः सिहं प्रत्यञ्चमत्स्याः क्रोष्टा वराहान्निरतत्थ कक्ष्यात् ॥ यँज्ञस्याऽनुष्टुप् मृत्तिका । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे । उद्धृतासि वराहेण कृष्णेन शतबाहुना । मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च । मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिमंत्रिता । मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् । वाचा कृतं कर्म कृतं मनसा यत्तु चिन्तितम् । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् । त्वया

---

१ दखन से। २ पश्चिम से। ३ उत्तर से। ४ दूसरी मिट्टी पानीमें मल नाभिस्थान के ऊपर मलना।

हृतेन पापेन ब्रह्मलोकं व्रजाम्यऽहम् ॥ कुत्सस्य रुद्रो जगती । मा नस्तोके तनये मा न आयौ मा नो गोषु । मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥ ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः । ओंसत्यं ॥ प्राणायामः ॥ तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यऽनन्तरम् । कुरुक्षेत्रं गया गंगा प्रभासं पुष्कराणि च ॥ तीर्थान्येतानि सर्वाणि स्नानकाले भवन्तु मे । प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितम् । याचितं देहि मे तीर्थं सर्वपापापनुत्तये । रुद्रान्प्रपद्ये वरदान्सर्वानऽप्सुषदस्त्वहम् । सर्वानऽप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः । देवमऽप्सुषदं वह्निं प्रपद्येऽघनिसूदनम् । आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा । रुद्राश्चाग्निश्च सर्पाश्च वरुणस्त्वाप एवच । शमयन्त्वाशु मे पापं पुनन्त्वेते सदा मम ।

---

१ प्रथमांश को चार भाग करके । पहलाभाग माथे को मलना । २ द्वितीय भागसे । इति बाहे कन्दे पर मलना । ४ इति दाहे कन्देपर । ५ इति सिर को मल कर, प्राणायाम करना । ६ तीर्थों का प्रणाम ।

इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं जले ॥ [1]अपां पतये विद्महे, पाशपाणये धीमहि, तन्नो वरुणः प्रचोदयात् । ३ । ॐ तत्सद्ब्रह्माऽद्यतावत्तिथावद्याऽमुकमास्या-मुकपक्षस्य तिथावऽमुकायामाऽत्मनो वाङ्मनःकायो-पार्जितपापनिवारणार्थं श्रीविष्णुप्रीत्यर्थमऽमुकनद्याः प्रवाहे स्नानमऽहं करिष्ये ओंकुरुष्व ॥ ओं[2]तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्य-त्परमं पदत् ॥ ओं[3]भूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यम् ॥ ओंहंसः[4] शुचिषद्वसुरऽन्तरिक्ष-द्धोता वेदिषदऽतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्यो-मसदऽब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥ ओंनमो देवेभ्यः । कण्ठोपवीती । स्वाहा ऋषिभ्यः । अपसव्येन । स्वधा पितृभ्यः । सव्येन । आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं

---

१ तीसरा भाग पानी की अञ्जली में रखके संकल्प पढके नदी में छोडना । २ सिर को अञ्जली से पानी फीकना ॥ ३ सिर को छिटकना । ४ उपस्थान ।

सचराचरं जगत्तृप्यतु तृप्यतु तृप्यतु एवमस्तु ॥ [1]यच्च-गऽस्थिगतं पापं जन्मान्तरकृतं च यत् । तन्मे हरस्व कल्याणि मूर्ध्नि स्पर्शेन वैष्णवि ॥ युवा[2] सुवासाः परि-वीत आगात्स उश्रेयान्भवति जायमानः । तन्धी-रासः कवय उन्नयन्ति साध्यो मनसा देवयन्तः ॥ अस्मत्[3]कुले तु ये जाता अपुत्रा गोत्रवर्जिताः । ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥ इति स्नान-विधिः ॥

॥ अथ सन्ध्योपासना ॥

श्रीं[4]महागायत्र्यै नमः । सावित्र्यै नमः । सरस्वत्यै नमः ॥ ओंप्रणवस्य ऋषिर्ब्रह्मा, गायत्रं छन्द एव च । देवोऽग्निर्व्याहृतिषु च, विनियोगः प्रकीर्तितः ॥ प्रजा-पतेर्व्याहृतयः, पूर्वस्य परमेष्ठिनः । व्यस्ताश्चैव सम-स्ताश्च, ब्राह्मऽक्षरमोमिति ॥ व्याहृतीनां समस्तानां, दैवतं तु प्रजापतिः । व्यस्तानामऽयमऽग्निश्च, वायुः

---

१ चौथमा भाग से माथे पर तिलक करना । २ वस्त्र पहनना । ३ लंगूठी निचौडना । ४ नमस्कार करना ।

सूर्यश्च देवताः ॥ छन्दश्च व्याहृतीनामेकाऽक्षराणामुक्ताख्यं, द्व्यक्षराणामऽत्युक्ताख्यम् । विश्वामित्र ऋषिश्छन्दो, गायत्रं सविता तथा ॥ देवतोपनये जप्ये, गायत्र्या योग उच्यते । आवाहयामि गायत्रीं, सर्वपापप्रणाशिनीम् ॥ न गायत्र्याः परं जप्यं, न व्याहृतिसमं हुतम् । आगच्छ वरदे देवि, जपे मे सन्निधौ भव ॥ गायन्तं त्रायसे यस्माद्गायत्री त्वं ततः स्मृता । अग्निर्वायुश्च सूर्यश्च बृहस्पत्याप एव च ॥ इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । एवमाऽऽर्ष छन्दो दैवत, विनियोगं चाऽनुस्मृत्य ॥ गायत्र्या शिखामाऽबद्ध्य, गायत्र्यैव समन्ततः । आत्मनश्चापः परिक्षिप्य, प्राणायामं कुर्यात् ॥ ओजोऽसीति गायत्रीमाऽऽवाह्य देवानामार्ष्मम् ॥ ओजोऽसि सहोऽसि बलमऽसि भ्राजोऽसि देवानांधाम नामासि । विश्वमऽसि विश्वायुः सर्वमऽसि सर्वायुरऽभिभूः ॥ ओंभूः ओंभुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यं ओंतत्सवि-

---

१ अपने आपको छडक के अञ्जलि करना। २प्राणायाम करने का मंत्र।

तुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ओंआपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ ओं[1]अग्निश्च मा मन्युश्च, मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यदऽह्ना पापमऽकार्षं, मनसा वाचा हस्ताभ्यां, पद्भ्यामुदरेण शिश्ना । अहस्तदऽवलुम्पतु, यत्किंचिदुरितं मयीदमऽहमाऽपोऽमृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ॥ ओं[2]सूर्यश्च मा मन्युश्च, मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षं, मनसा वाचा हस्ताभ्यां, पद्भ्यामुदरेण शिश्ना । रात्रिस्तदऽवलुम्पतु, यत्किंचिदुरितं मयीदमऽहमाऽऽपोऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ॥ ओं[3]आपः पुनन्तु पृथिवीं, पृथिवी पूता पुनातु माम् । पुनातु ब्रह्मणस्पतिर्ब्रह्म पूतं पुनातु माम् । यदुच्छिष्टमऽभोज्यं वा, यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामाऽऽपोऽसतां च प्रतिग्रहं जुहोमि स्वाहा ॥

---

१ सायं की तीन आचमन । २ प्रातः की तीन । ३ मध्याह्न की तीन आचमन करना ।

आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधात न ।
महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भा-
जयतेह नः । उशतीरिव मातरः ॥ तस्मा अरंगमाम
वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
हिरण्यवर्णाः शुचयः पावका, यासु जाताः कश्यपो
यास्विन्द्रः । या अग्निं गर्भं दधिरे विरूपास्ता न आपः
शंस्योना भवन्तु ॥ १ ॥ ओंयासां देवा दिवि कृण्वंति
भक्ष्यं, या अन्तरिक्षे बहुधा भवन्ति । या० ॥ २ ॥
ओंयासां राजा वरुणो याति मध्ये, सत्याऽनृते अव-
पश्यञ्जनानाम् । या० ॥ ३ ॥ ओंशिवेन मा चक्षुषा
पश्यताऽऽपः शिवया तन्वोपस्पृशत त्वचं मे । मधुश्युतः
शुचयो याः पावकास्ता न आपः शंस्योना भवन्तु
॥ ४ ॥ ओंशन्नो देवीरऽभीष्टय आपो भवन्तु पीतये,
शंय्योरऽभिस्रवन्तु नः ॥५॥ ओंशन्न आपो धन्वन्याः,
शन्नः सन्त्वऽनूप्याः । शन्नः समुद्रिया आपः शमुनः

---

१ छोतेको छिडकना । २ पैरों को । ३ सिरको । ४ छाते को ।
५ पैरों को । ६ सिर को । ७ सिर को । ८ छाते को । ९ पैरों को ।
१० छाते और सिरको फी मंत्र से ।

सन्तु कूप्याः ॥ ६ ॥ आपो अस्मान्मातरः शुन्धयन्तु घृतेन मा घृतपाः पुनन्तु । विश्वं हि रिप्रं प्रवहन्तु देवीरुदिदाभ्यः शुचिरापूत एमि ॥ ७ ॥ इदमापः प्रवहत यत्किञ्चिदुरितं मयि । यद्वाहमभिदद्रोह यद्वा शेप उतानृतम् ॥ ८ ॥ मुञ्चन्तु मा शपथ्यादऽथो वारुण्यादुत । यथो यमस्य पड्वीशात्सर्वस्माद्देव किल्विषात् ॥ ९ ॥ यज्जाग्रद्यत्सुप्तः पापमभिजगाम । सर्वस्मान्मा तस्मादेनसः प्रमुञ्चतु ॥ १० ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रण आयूंषि तारिषत् ॥ ११ ॥ [1]ओंद्रुपदादिवेन्मुमुचानः, स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाऽज्यमाऽऽपः शुन्धन्तु मैनसः ॥ [2]ओंऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरऽजायत, ततः समुद्रो अर्णवः ॥ समुद्रादऽर्णवादऽधि, संवत्सरो अजायत । अहोरात्राणि व्यदधद्विश्वस्य मि-

---

१ बाहे तरफ तीन जलाञ्जलि सूँग के छोडना । २ पानी में हाथों से तीन आवर्तन करना ।

षतो वशी ॥ सूर्याचन्द्रमसौ धाता; यथापूर्वमऽकल्पयत्। दिवं च पृथिवीं, चाऽन्तरिक्षमऽथो स्वः ॥ [1]ओंभूः ओं-भुवः ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यम् ॥ ओं-[2]अन्तश्चरसि भूतेषु, गुहायां विश्वतो मुखः। त्वं यज्ञस्त्वं वषट्कार, आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ प्राणायामः ॥ [3]ओंभूर्भुवःस्वस्तत्सवितु० ३ ॥ [4]ओं-उद्वयन्तमसस्परि, ज्योतिष्पश्यन्त उत्तरम्। देवं देवत्रा सूर्यमऽगन्म ज्योतिरुत्तमम् ॥ ओंउदुत्यं जातवेदसं, देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥ ओंचित्र-न्देवानामुदगादनीकं, चक्षुर्मित्रस्य वरुणस्याऽग्नेः। आ प्रा द्यावापृथिवी अन्तरिक्षं, सूर्य आत्मा जगतस्तस्थु-षश्च ॥ ओंतच्चक्षुर्देवहितं, पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं, जीवेम शरदः शतम् ॥ ओंहंसः शुचिष-द्वसुरऽन्तरिक्षसद्धोता वेदिषदऽतिथिर्दुरोणसत्। नृषद्व-रसदृतसद्व्योमसदऽब्जा गोजा ऋतजा अद्रिजा ऋतम् ॥

---

१ सिर को छिडकना। २ तीन आचमन। ३ सूर्यके संमुख तीन जलाञ्जलि छोडना। ४ उपस्थान।

ओंविभ्राड्बृहत्पिबतु, सोम्यं मध्वायुर्दधद्यज्ञपता अविहुतम् । वातजूतोयो, अभिरक्षत्यात्मना, प्रजा पिपर्ति बहुधा विराजति ॥ [1]ओंआनुष्टुभस्य सूक्तस्य, त्रिष्टुबन्तस्य देवता । विश्वात्मा पुरुषः साक्षाद्दर्षिर्नारायणः स्मृतः ॥ "ओंपुरुषमेधाः पुरुषस्य नारायणस्याऽऽर्षम्॥" ओंसहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वाऽऽत्यतिष्ठद्दशांगुलम् ॥ पुरुष एवेदं सर्वं, यद्भूतं यच्च भव्यम् । उताऽमृतत्वस्येशानो, यदऽन्नेनाऽतिरोहति ॥ एतावानऽस्य महिमाऽतो ज्यायांश्च पूरुषः । पादोऽस्य विश्वा भूतानि त्रिपादऽस्याऽमृतं दिवि ॥ त्रिपादूर्ध्व उदैत्पुरुषः, पादोऽस्येहाऽभवत्पुनः । ततो विश्वं व्यक्रामत्साशनाऽनशने अभि ॥ तस्माद्विराडऽजायत विराजो अधिपूरुषः । स जातो अत्यरिच्यत पश्चाद्भूमिमऽथो पुरः ॥ यत्पुरुषेण हविषा देवा यज्ञमऽतन्वत । वसन्तो अस्याऽऽसीदाऽऽज्यं, ग्रीष्म इध्मः शरद्धविः ॥ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातम-

---

१ विष्णु का ध्यान करना ।

ऽग्रतः । तेन देवा अयजन्त, साध्या ऋषयश्च ये ॥ तस्माद्यज्ञात्सर्वहुतः, संभृतं पृषदाऽऽज्यम् । पशूंस्तांश्चक्रे वायव्यानाऽऽरण्यान्ग्राम्यांश्च ये ॥ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादऽजायत ॥ तस्मादऽश्वा अजायन्त, ये के चोभयादतः । गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥ यत्पुरुषं व्यदधुः, कतिधा व्यकल्पयन् । मुखं किमऽस्य कौ बाहू, का ऊरू पादा उच्येते ॥ ब्राह्मणोऽस्य मुखमाऽऽसीद्बाहू राजन्यः कृतः । ऊरू तदऽस्य यद्वैश्यः, पद्भ्यां शूद्रो अजायत ॥ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च, प्राणाद्वायुरऽजायत ॥ नाभ्या आसीदऽन्तरिक्षं, शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानऽकल्पयन् ॥ सप्ताऽस्याऽऽसन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञं तन्वाना, अबध्नन्पुरुषं पशुम् ॥ यज्ञेन यज्ञमऽयजन्त देवा, स्तानि धर्माणि प्रथमान्याऽऽसन् । ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति

देवाः ॥ ब्रह्मणस्त्रिष्टुप मनः ॥ ओं यज्जाग्रतो दूरमुदैति दैवं, तदु सुप्तस्य तथैवैति । दूरंगमं ज्योतिषां ज्योतिरेकं, तन्मे मनः शिवसंकल्पमस्तु ॥ येन कर्माण्यऽपसो मनीषिणो, यज्ञे कृण्वन्ति विदथेषु धीराः । यदऽपूर्वं यक्षमऽन्तः प्रजानां, तन्मे० ॥ यत्प्रज्ञानमुत चेतो धृतिश्च, यज्ज्योतिरऽन्तरऽमृतं प्रजासु । यस्मान्न ऋते किञ्चन कर्म क्रियते, तन्मे० ॥ येनेदं भूतं भवनं भविष्यत्परिगृहीतमऽमृतेन सर्वम् । येन यज्ञस्तायते सप्तहोता, तन्मे० ॥ यस्मिन्नृचः सामयजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाऽराः । यस्मिंश्चित्तं सर्वमोतं प्रजानां, तन्मे० ॥ सुषारथिरऽश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव । हृत्प्रतिष्ठं यदऽजरं यविष्ठं, तन्मे० ॥ अथ य एष एतस्मिन्मण्डले, पुरुषो यश्चैष हिरण्मयः पुरुषः । अथ य एष एतस्मिन्मण्डले, पुरुषोऽयमेव सोयं दक्षिणेऽक्षन्पुरुषः ॥ शुक्रियं रुद्रस्य । य उदगात्पुरस्तान्महतो अर्णवाद्विभ्राजमानः सरिरस्य मध्ये । स मामृषभो

---

१ संहारमुद्रा करके शिवका ध्यान । २ उपस्थान करना ।

रोहिताक्षः, सूर्यो विपश्चिन्मनसा पुनातु । यद्ब्राह्मा-दिष्म तन्मा मा हिंसीत्सूर्याय बिभ्राजाय वै नमो नमः ॥ [1]अं नाभौ । उ हृदि । म शिरसि ॥ भूः पा-दयोः । भुवः हृदि । स्वः शिरसि ॥ ओंभूः अङ्गुष्ठाभ्यां नमः । भुवः तर्जनीभ्यां नमः । स्वः मध्यमाभ्यां नमः । महः अनामिकाभ्यां नमः । जनः कनिष्ठि-काभ्यां नमः । तपः सत्यं करतलकरपृष्ठाभ्यां नमः ॥ भूः पादयोः । भुवः जान्वोः । स्वः गुह्ये । महः नाभौ । जनः हृदि । तपः कण्ठे । सत्यं शिरसि ॥ ओंभूः हृदयाय नमः । भुवः शिरसे स्वाहा । स्वः शिखायै वषट् । महः कवचाय हुँ । जनः नेत्राभ्यां वौषट् । तपः सत्यमस्त्राय फट् ॥ तत्सवितुरङ्गुष्ठाभ्यां नमः । वरेण्यं तर्जनीभ्यां नमः । भर्गो देवस्य मध्य-माभ्यां नमः । धीमहि अनामिकाभ्यां नमः । धियो योनः कनिष्ठिकाभ्यां नमः ॥ प्रचोदयात् करतलकर-पृष्ठाभ्यां नमः ॥ तत्पादयोः । सवितुर्जान्वोः । वरेण्यं कट्यां । भर्गो नाभौ । देवस्य हृदये । धीमहि कण्ठे ।

---

1 न्यास करना ।

धियो नासिकायां । यश्चक्षुषे । नः ललाटे । प्रचोदयात् शिरसि ॥ तत्सवितुर्हृदयाय नमः । वरेण्यं शिरसे स्वाहा । भर्गो देवस्य शिखायै वषट् । धीमहि कवचाय हुँ । धियो योनः नेत्राभ्यां वौषट् । प्रचोदयादऽस्त्राय फट् ॥ ओंआपःस्तनयोः । ज्योतिर्नेत्रयोः । रसो मुखे । अमृतं ललाटे । ब्रह्मभूर्भुवः स्वरों शिरसि ॥ तत्सवितुर्हृदयाय नमः । स संपुटाय नमः । वि विततायै नमः । तुर्विस्तीर्णाय नमः । व द्विमुखाय नमः । रे त्रिमुखाय नमः । ण्य चतुर्मुखाय नमः । अं पंचमुखाय नमः । भ षण्मुखाय नमः । गों अधोमुखाय नमः । दे व्यापकाञ्जलये नमः । व शकटाय नमः । स्य यमपाशाय नमः । धी ग्रन्थिकायै नमः । म संमुखोन्मुखाय नमः । हि विलम्बाय नमः । धी मुष्टिकायै नमः । यो मीनाय नमः । यो कूर्माय नमः । नः वराहाय नमः । प्र सिंहाक्रान्ताय नमः । चो महाक्रान्ताय नमः । द मुद्गराय नमः । यात्पल्लवाय नमः ॥ प्राणायामः ॥ [2]अस्यश्री

---

१ अथ मुद्रा । २ पानी से सङ्कल्प छोडना ।

महागायत्रीशापोद्धारमन्त्रस्य विश्वामित्र ऋषिः, विष्टार-पङ्क्तिगायत्रं छन्दः, सविता देवता, शापोद्धारे विनियोगः ॥ ओं[1] ब्रह्मणाग्निः संविदानो रक्षोहा बाधितामितः । अमीवायुस्ते गर्भं दुर्नामा योनिमाशये १० "इति ऋग्वेदे" हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १० ॥ "इति यजुर्वेदे" ओं आवायव्य यावायव्या यान्योर्वायायवः ओंहरोसि पाप्मानं मे विद्धिः ॥ १० ॥ "इति सामवेदे" सुभद्रा पावनी सुधा गायत्री विश्वभेषजम् । विशापामेनां कृत्वा यथास्तं विपरीतन १० "इति अथर्ववेदे" ॥ ॥ तत्सवितुरिति[2] मन्त्रस्य, विश्वामित्र ऋषिः, गायत्रं छंदः, सविता देवता, आत्मनो वाङ्मनःकायोपार्जितपापनिवारणार्थं नित्यकर्मनिमित्तं चतुर्वर्गसिद्ध्यर्थं जपे विनियोगः ॥ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्[3] युक्तामिन्दुनिबद्धरत्नमुकुटां, तत्त्वाऽऽत्मवर्णा-

---

१ चार वेदों की चार मंत्रों का दशांश जपना । २ सङ्कल्प छोडना । ३ ध्यान धारना ।

त्मिकाम् । गायत्रीं वरदाऽभयाऽङ्कुशकरां, शूलं कपालं गुणं शङ्खं चक्रमऽथाऽरविन्दुयुगलं हस्तैर्वहन्तीं भजे ॥ आगच्छ वरदे देवि, त्र्यक्षरे ब्रह्मवादिनि । गायत्रिच्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते ॥ ३ ॥ ओंभूर्भुवः[1] स्वस्तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयादों ॥१०८॥ प्राणायामः ॥ देशभिर्जन्मचरितं[2], शतेन च पुरा कृतम् । त्रियुगोत्थं सहस्रेण, गायत्री हन्ति किल्बिषम् ॥ देवा गातु श्रोत्रियाः । देवा गातुविदो, गातुं वित्वा गातुमित मनसस्पत इमं देवयज्ञं स्वाहा, वाचे स्वाहा वाते धाः ॥ ओंनमः[3] प्राच्यै दिशे याश्च देवता, एतस्यां प्रतिवसन्ति, एताभ्यश्च वो नमः ॥१॥ नमोऽवान्तरायै[4] दिशे० ॥ नमो दक्षिणायै[5] दि० ॥ नमोऽवान्तरायै[6] दि० ॥ नमः प्रतीच्यै[7] दि० ॥ नमोऽवान्तरायै[8] दि० ॥ नम उदीच्यै[9] दि० ॥ नमोऽवान्तरायै[10]

---

१ मूलमन्त्र का यथा संभव जप करना । २ तर्पण करना । ३ पूर्व को प्रणाम । ४ अग्निकोण को । ५ दक्षिण को । ६ नैर्ऋत कोण को । ७ पश्चिम को । ८ वायव्य कोण को । ९ उत्तर को । १० ईशानकोण को ।

दि० ॥ [1]नम ऊर्ध्वायै दि० ॥ [2]नमोऽधरायै दिशे याश्च देवताएतस्यां प्रतिवसन्ति एताभ्यश्च वो नमः॥ ओं [3]नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि ॥ इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति। य एवं विद्वान् स्वाध्यायमधीते ॥ ब्रह्मादयः सर्वे देवास्तृप्यन्तु। कण्ठोपवीती। सनकादयः सर्वे ऋषयस्तृप्यन्तु तृप्यन्तु॥ अपसव्येन ॥ अग्निष्वात्तादयः सर्वे पितरतृप्यन्तु ॥ ३ ॥ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। नमः स्वधा च स्वाहा च नित्यमेव भवन्त्विह। ओंतत्सद्ब्रह्म अद्य तावत्तिथावित्यादि ॥ पिता अमुकोमुकगोत्रः स्वधा नमः तृप्यताम् ॥ ३ ॥ पितामहः। प्रपितामहः ॥ ३ ॥ माता–स्वधा नमः तृप्यताम् ॥ ३ ॥ पितामही स्व०, प्रपितामही स्व०, मातामहः स्व०, प्रमातामहः स्व०, वृद्धप्रमातामहः स्व० मातामही स्व० प्रमातामही स्व० वृद्धप्रमातामही स्व० ॥ "इत्थमऽन्यान्सम्बन्धिनश्च तर्पयित्वा" मातृप-

---

१ ऊपर को। २ नीचे को। ३ तर्पण करना।

क्ष्यास्तु ये केचिद्ये चान्ये पितृपक्षजाः । गुरुश्वशुरबन्धूनां ये कुलेषु समुद्भवाः ॥ ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः । जलदानेन ते सर्वे लभन्तां तृप्तिमुत्तमाम् ॥ समस्तमातापितृभ्यो द्वादशदैवतेभ्यः पितृभ्यो हिमपानं स्वधा, क्षीरपानं स्वधा, मधुपानं स्वधा, तिलोदकं स्वधा, उदकतर्पणं स्वधा । हिमं २ रजतम् ॥ २ ॥ 'सव्येन' नमो देवेभ्यः "कण्ठोपवीती" स्वाहा ऋषिभ्यः । "अपसव्येन" स्वधा पितृभ्यः "सव्येन" आब्रह्मस्तम्बपर्यन्तं ब्रह्माण्डं सचराचरं । जगत्तृप्यतु तृप्यतु तृप्यतु ॥ एवमस्तु ॥ [1]नमो धर्मनिधानाय नमः सुकृतसाक्षिणे । नमः प्रत्यक्षदेवाय भास्कराय नमो नमः । [2]शान्तिः पुष्टिस्तथा तुष्टिः सन्तु मे त्वत्प्रसादतः । सर्वपापप्रशान्तिश्च तीर्थराज ! नमोऽस्तु ते ॥ इति सन्ध्योपासनाविधिः ॥

॥ अथ नैवेद्यमन्त्राः ॥

[3]अमृतेशमुद्रयाअमृतीकृत्य । अमृतमस्तु अमृतायतां नैवेद्यं । सावित्राणि सावित्रस्य देवस्य त्वा सवितुः प्र-

---

१ सूर्य को प्रणाम । २ तीर्थको प्रणाम । ३ दानों हाथों की अंगूठ पात्र में रखके पडना ।

सवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे । महागणपतये कुमाराय श्रियै सरस्वत्यै लक्ष्म्यै विश्वकर्मणे द्वार्देवताभ्यः प्रजापतये ब्रह्मणे कलशदेवताभ्यः ब्रह्मविष्णुमहेश्वरदेवताभ्यः चातुर्वेदेश्वराय सानुचराय ऋतुपतये नारायणाय 'मार्गशीर्षे' रुक्मिणीसहिताय कृष्णाय । श्रीसहिताय केशवाय । 'पौषे' प्रियास० अनन्ताय । वागीश्वरीस० नारायणाय । 'माघे' प्रीतिस० अच्युताय । कान्तास० माधवाय । 'फाल्गुने' शक्तिस० चक्रिणे । क्रियास० गोविन्दाय । 'चैत्रे' सिद्धिस० वैकुण्ठाय । मतिस० विष्णवे । 'वैशाखे' शोभास० जनार्दनाय । विभूतिस० मधुसूदनाय । 'ज्येष्ठे' महिमास० उपेन्द्राय । इच्छास० त्रिविक्रमाय । 'आषाढे' लक्ष्मीस० यज्ञपुरुषाय । धृतिस० वामनाय । 'श्रावणे' कान्तिस० वासुदेवाय । रतिस० श्रीधराय । 'भाद्रपदे' प्राप्तिस० हरये । मायास० हृषीकेशाय । 'आश्वयुजे' प्राकाम्यास० योगीश्वराय । धीस० पद्मनाभाय । 'कार्तिके' लघिमास० पुण्डरीकाक्षाय । गरि-

मास० दामोदराय। 'मलिम्लुचे' शक्तिस० योगीश्वराय। सत्यभामास० नरकारये, निष्कलास० महामार्तण्डाय॥ दुर्गायै त्र्यम्बकाय वरुणाय यज्ञपुरुषाय अग्निष्वात्तादिभ्यः पितृगणयागदेवताभ्यः। भगवते वासुदेवाय सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय सत्याय पुरुषाय अच्युताय माधवाय गोविन्दाय सहस्रनाम्ने विष्णवे लक्ष्मीसहिताय नारायणाय। भवायदेवाय शर्वायदेवाय रुद्रायदेवाय पशुपतयेदेवाय उग्रायदेवाय भीमायदेवाय महादेवाय ईशानायदेवाय ईश्वरायदेवाय उमासहिताय-शिवाय पार्वतीसहिताय परमेश्वराय। विनायकाय एकदन्ताय कृष्णपिङ्गलाय गजाननाय लम्बोदराय भालचन्द्राय हेरम्बाय आखुरथाय विघ्नेशाय विघ्नभक्ष्याय वल्लभासहिताय श्रीमहागणेशाय। क्लीं कां कुमाराय षण्मुखाय मयूरवाहनाय सेनाधिपतये कुमाराय। भगवते हांहींसः सूर्याय, सप्ताश्वाय अनश्वाय एकाश्वाय नीलाश्वाय प्रत्यक्षदेवाय परमार्थसाराय तेजोरूपाय प्रभासहिताय आदित्याय। भगवत्यै अमायै कामायै चार्वङ्ग्यै टङ्कधारिण्यै तारायै पार्वत्यै यक्षिण्यै श्रीशारिकाभगवत्यै

श्रीशारदाभगवत्यै श्रीमहाराज्ञीभगवत्यै श्रीज्वालाभगवत्यै व्रीडाभगवत्यै वैखरीभगवत्यै वितस्ताभगवत्यै गङ्गाभगवत्यै यमुनाभगवत्यैकालिकाभगवत्यै सिद्धलक्ष्म्यै महालक्ष्म्यै महात्रिपुरसुन्दर्यै सहस्रनाम्न्यै देव्यै भवान्यै । अभयङ्करीदेव्यै क्षेमङ्करीभगवत्यै सर्वशत्रुघातिन्यै इह राष्ट्राधिपतये अमुकभैरवाय । इन्द्राय वज्रहस्ताय, अग्नये शक्तिहस्ताय, यमाय दण्डहस्ताय, निर्ऋतये खड्गहस्ताय, वरुणाय पाशहस्ताय, वायवे ध्वजहस्ताय, कुबेराय गदाहस्ताय, ईशानाय त्रिशूलहस्ताय, ब्रह्मणे पद्महस्ताय, विष्णवे चक्रहस्ताय, अनन्तादिभ्योऽष्टाभ्यः कुलनागदेवताभ्यः । अग्न्यादित्याभ्यां वरुणचन्द्रमोभ्यां, कुमारभौमाभ्यां विष्णुबुधाभ्यां इन्द्राबृहस्पतिभ्यां सरस्वतीशुक्राभ्यां प्रजापतिशनैश्चराभ्यां गणपतिराहुभ्यां रुद्रकेतुभ्यां ब्रह्मध्रुवाभ्यां अनन्तागस्त्याभ्यां ब्रह्मणे कूर्माय ध्रुवाय अनन्ताय हरये लक्ष्म्यै कमलायै शिरुयादिभ्यः पञ्चचत्वारिंशद्वास्तोष्पतियागदेवताभ्यः ब्राह्म्यादिभ्योमातृभ्यः गौर्यादिभ्योमातृभ्यः ललितादिभ्योमातृभ्यः दुर्गाक्षेत्रगणेश्वरदेवताभ्यः राकादेव-

ताभ्यः त्रिकादेवताभ्यः सिनीवालीदेवताभ्यः यामी-देवताभ्यः रौद्रीदे० वारुणीदे० बार्हस्पत्यदे० ओंभूर्दे० ओंभुवोदे० ओंस्वर्दे० ओंभूर्भुवःस्वर्दे० अखण्डब्रह्माण्ड-यागदेवताभ्यः धूर्भ्यः उपधूर्भ्यः महागायत्र्यै सावित्र्यै सरस्वत्यै हेरकादिभ्यो बटुकादिभ्यः ॥ उत्पन्नममृतं दिव्यं प्राक्क्षीरोदधिमन्थनात् । अन्नममृतरूपेण नैवेद्यं प्रतिगृह्यताम्। ओं[1]तत्सद्ब्रह्माऽद्यतावत्तिथावद्याऽमुकमास-स्यामुकपक्षस्य तिथावमुकायामात्मनो वाङ्मनःकायोपा-र्जितपापनिवारणार्थमऽमुककर्मनिमित्तमोंनमो नैवेद्यं नि वेदयामि नमः ॥ [2]या काचिद्योगिनी रौद्रा सौम्या घोर-तरा परा । खेचरी भूचरी रामा तुष्टा भवन्तु मे सदा । आकाशमातृभ्योऽन्नं नमः आकाशमातृभ्यः समाल-भनं गन्धो नमः अर्घो नमः पुष्पं नमः ॥ [3]ॐअमुकदेवाय पायसं मोदकान् पक्वान्नमऽपूपान् वाऽन्नादि समर्पयामि नमः ॥ योऽ[3]स्मिन्निवसति क्षेत्रे क्षेत्रपालः सकिंकरः ।

---

१ इष्टदेवताका ध्यान पडकर । २ मातृकायों का भाषया 'चुटे' बल देना । ३ इष्टदेवताका ध्यान पडकर । क्षेत्रपाल के बलिपर अक्षत और पानी छोडना ।

तस्मै निवेदयाम्यद्य बलिं पानीयसंयुतम् । क्षांक्षेत्राधिपतयेऽन्नं नमः रांराष्ट्राधिपतयेऽन्नं नमः सर्वाभयवरप्रदो मयि पुष्टिं पुष्टिपतिर्दधातु ॥ [1]आपन्नोऽस्मि शरण्योसि सर्वावस्थासु सर्वदा। भगवंस्त्वां प्रपन्नोस्मि रक्ष मां शरणागतमित्यादि क्षमापुष्पाणि दत्त्वा । उभाभ्यां जानुभ्यां पाणिभ्यां शिरसा वचसा चोरसा मनसा च नमस्कारं करोमि नमः ॥ [2]नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते कृणोमि । इत्येतासामेव देवतानां सार्ष्टिं सायुज्यं सलोकतां सामीप्यमाप्नोति य एवं विद्वान्स्वाध्यायमधीते ॥ इति नैवेद्यमन्त्रः ॥

॥ अथ भोजनविधिः ॥

ओं तत्रादौ लेपनं कृत्वा । पश्चार्द्रौ भोजनं कुर्याद्वाग्यतः प्राङ्मुखः शुचिः । हस्तौ पादौ तथा वक्त्रमेषा पञ्चार्द्रता मता ॥ [3]अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः कथयेदिदम् । अस्माकं नित्यमस्त्वेतदिति स्मृत्वा च

---

१ प्रार्थना करना । २ तर्पण करना । ३ अन्न को देख प्रणाम देना।

वन्दयेत् ॥ [1]अन्नपते अन्नस्य नो देहि अनमीवस्य शुष्मिणः । प्र प्रदातारं तारिषमूर्जं नो देहि द्विपदे शं चतुष्पदे ॥ [2]ओं उच्छिष्टोच्छिष्टोपहतं यच्च पापेन हतं मृतसूतकाद्वा । वसोः पवित्रमग्निः सवितुश्च रश्मयः पुनन्त्वन्नं मम दुष्कृतं यच्चान्यत् ॥ [3]ओं भूपतये नमः ओं भुवनपतये नमः ओं भूतानां पतये नमः ॥ ३ ॥ [4]अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्योतीरसोऽमृतम् । ब्रह्मभूर्भुवःस्वरोम् ॥ ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । ओममृतोपस्तरणमसि स्वाहा॥[5]प्राणाय स्वाहा,अपानाय स्वाहा,समानाय स्वाहा, उदानाय स्वाहा, व्यानाय स्वाहा, [6]अमृतापिधान-

---

१ अन्नपात्र को पकडकर । २ अन्न को पानी से छडकाना । ३ दाहे तरफ अन्न के तीन भाग छोडना । ४ अपोशन लेना । ५ अन्न खाना । ६ इन मन्त्रों के युक्त जीब से ही खाकर, भाकय इष्टदेव के मंत्र से फी ग्रास मन्त्रित खाकर, मुख को गंडूषों से शुद्धकर आचमन पीना ।

मसि स्वाहा ॥ अंङ्गुष्ठमात्रः पुरुषः सोङ्गुष्ठाग्रमुपाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥ प्राणोग्निः परमात्मा वै पञ्चवायुसमाश्रितः । स प्रीतः प्रीणातु विश्वं विश्वभुक् ॥ विश्वोसि वैश्वानरोसि विश्वमाभाससे जायमानः । विशन्ति त्वामाहुतयश्च सर्वाः प्रजास्तत्र यत्र विश्वामृतोऽसि ॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ अहमन्नमहमन्नमहमन्नादोऽहमन्नादः ॥ राज्ञां शिव चास्तु तथा द्विजानां गवां शिवं चास्तु तथा प्रजानाम् । आतङ्कहीनं जगदस्तु सर्वं दोषाः प्रणाशं सकलाः प्रयान्तु ॥ इति भोजनविधिः ॥

॥ अथ पञ्चगव्यविधिः ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥

---

१ शुद्ध किई हुई दाहे हाथ के अंगूठसे दाहे पैर के अंगूठ पर पानी छोडना । २ इष्टदेव की स्मरना करनी ।

* यह वस्तु पञ्चगव्य है ।

ओं[1] गायत्र्यै नमः ओंभूर्भुवःस्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३ ॥ गन्ध[2]द्वारां दुराधर्षां नित्यपुष्टाङ्करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ आप्या[3]यस्व समेतु ते विश्वतः सोमवृष्ण्यम् । भवा वाजस्य सङ्गथे ॥ दधि[4]क्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत् प्र ण आयूंषि तारिषत् ॥ तेजो[5]सि शुक्रमसि ज्योतिरसि धामासि प्रियन्देवानामनाधृष्टं देवयजनं देवताभ्यस्त्वा देवताभ्योगृह्णामि देवेभ्यस्त्वा यज्ञेभ्यो गृह्णामि ॥ देव[6]स्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥ आँपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन, महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयते हनः, उशतीरिव मातरः । तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ, आपो जनयथा चनः ॥ एतो[7] न्विन्द्रं स्तवामहेऽहं शुद्धः शुद्धेन साम्ना ।

---

१ गोमूत्र को पडना । २ गोमय को । ३ दूध को । ४ दही को । ५ गेईको । ६ याने, विष्टरसमेत पानी । ७ इकठ्ठा मेलाप करना । ८ अब कुशा के विष्टर से दिशायों की शुद्धि करनी ।

शुद्धैरुक्तैर्वावृध्या संशुद्ध आशीर्वान्मम ॥ तुतान्धुवाम यङ्गिर इन्द्रमुक्था नवावृधः । पुरूण्यऽस्य पांस्यामिषा-सन्तो हवामहे ॥ इन्द्र शुद्धो हतो नहि शुद्धः शुद्धा भि-रूतिभिः । शुद्धो रयिं निधारय शुद्धः समद्धि सौम्यः ॥ इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे । शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजो सिषामहि ॥ पञ्चव्युष्टी-रनु पञ्च दुहा गाः पञ्चनाम्नीमृतवोऽनुपञ्च । पञ्चदिशः पञ्चदशेन कल्पाः समानमूर्ध्नीरभिलोकमेकम् ॥ औ-दुम्बरे[1] पद्मपत्रे रौप्यपात्रे हिरण्मये । प्रणवेन पिबेत्तत्तु त्रीन्वारान् पञ्चगव्यकम् ॥ इति पञ्चगव्यविधिः ॥

[गायत्रीकी प्रार्थना] ॐ दुर्निवारभवध्वान्तध्वंसनैककृते-क्षणाम् । नौमि मोहविनाशाय भीतो ब्रह्मादिदैवताम् १ दुर्गतिं हर मे देवि बहुजन्मशतार्जिताम् । प्राप्य कल्प-तरुच्छायां कथं सन्तप्यते जनैः २॥ पश्य मामाऽशु गा-यत्रि बिभ्यतं स्निग्धचक्षुषा । न बालमऽबलं पुत्रं मुञ्च-

---

१ सुने या रूप्य या ताम्रपात्र या पद्मपत्र से ओं इह मंत्र पडकर तिनवार पीजा ॥

त्यग्रगमऽम्बिका ३ ॥ एहि मां पाणिपद्मेन देहि तूर्णं वरं शुभम् । महामोहाकुलं दीनमेहि मां स्पर्श नित्यशः ४ ॥ मातः प्रतीक्षते नाऽर्तो यत्तदाशु प्रसीद मे । हित्वाऽक्षसूत्रं सावित्रि निर्विघ्नं पश्य मामिह ५ ॥ शृण्वतो नाऽन्यकृत्यं स्यात्तत्त्वं परहितं कुरु । ब्रह्मविष्णुहराद्या-स्त्वामाऽश्रयन्ति सुरेश्वरि ६ ॥ इति गायत्रीप्रार्थनास्तुतिः ॥

अथ ब्राह्मीविद्या ॥ ॐ ॐ ॐ त्रिगुणपुरुष क्षेत्रचर मोहं भिन्धि रजस्तमसी भिन्धि, प्राकृतपाशजालं सा-वरणं परिहर सत्त्वं गृहाण पुरुषोत्तमोसि सोमसूर्यान-लप्रवरपरमधामन् ब्रह्मविष्णुमहेश्वरस्वरूप सृष्टिस्थितिसं-हारकारक-भ्रूमध्यनिलय तेजोसि धामासि अमृतात्मन् ॐ तत्सत् हंसःशुचिषत् वसुरन्तरिक्षसत् होता वेदिषत् अतिथिर्दुरोण-सत् । नृषत्वरसत् ऋतसत् व्योमसत् अब्जागोजाऋतजा अद्रिजा ऋतं परंब्रह्मस्वरूप सर्वगत सर्वशक्ते सर्वेश्वर सर्वेन्द्रियग्रन्थिभेदं कुरु कुरु परमंपदं परामर्शय परमार्ग ब्रह्मद्वारं सर कुमार्गं जहि षाट्कौशिकं शरीरं त्यज शुद्धोसि बुद्धोसि विमलोसि क्षमस्व स्वपद-मास्वादय आस्वादय स्वाहा ॥ इति ब्राह्मीविद्योपनिषत् ॥

७ **देवीपूजा** (देवीपूजा-"राज्ञीस्तुतिः । या द्वादशार्क"-साहिभरूपभवानीवाक्यमञ्जरी-सरस्वतीस्तुतिः) ... ।=)

८ **चमानुवाक्यम्.** ... ... =)।

९ **रुद्रपञ्चकम्.** (रुद्रमंत्र-चम-सौमारुद्र-दीक्षा-शताध्यायात्मकम्) ... ... ।)

१० **कर्मकाण्डपुस्तकम्** (सांवत्सरिक पितृक्रियोपयोगि) ॥।=)

११ **वेदकल्पद्रुमः** (हवनक्रियोपयोगी. तथा चातुर्मास्योद्यापनविधिः-मूलगण्डान्तशान्ति-ग्रहशान्ति-अभिषेकमन्त्र-कलशोत्पत्तिग्रहोत्पत्तिः-कलशग्रहयोः स्थापनविधिः ग्रहबलिविधिः ग्रहक्षमापण-शंकुप्रतिष्ठा-वेश्मप्रतिष्ठा-पञ्चगव्यविधि-तुलादान-कन्यासंस्काराद्यात्मकः) १।)

१२ **मेखलापुस्तकम्** ऋचक-विवाहपद्धति-उपनयनपद्धति-अग्निकुण्डपूजा-कन्यासंस्कार-नान्दीमुखश्राद्ध-इह केलिपूजात्मकम् ... ... १॥)

१३ **वटुकपूजा** (कलशस्थापन-वैश्वदेव. व्याहृति. काश्मीरिक शिवरात्रिदिने वागूरद्वादशी-त्रयोदशीपूजादियुता अतीवोपयोगिनी गृहस्थाश्रमस्थितानां धार्मिकानाम्) ।=)

१४ **पार्थिवेश्वरपूजा** (कलशस्थापन-वैश्वदेवव्याहृत्यादियुता शिवोपासकानामतीवोपयोगिनी) ... ... ।=)

१५ **उपदेशपञ्चकम्** (शंकरस्वामिरचितं-रत्नप्रभाटीकया चालङ्कृतं सम्पूर्णवासिष्ठाशयगर्भं उपनिषत्सारभूतं-अतीवोपयोगि-मुमुक्षूणाम्) ... ... =)

१६ **योगवसिष्ठसारः** मूलमात्रम् ... ... =)

१७ **भक्तविवेकसारः** (अज्ञानबोधिनी-आत्मबोध-सटीकः प्रह्लादस्तुति-सटीकमुचुकुन्दस्तुति-सटीक–रासक्रीडा–पञ्चाध्यायीसटीक-गोपीस्तुतिसटीक-गोपीयुगलगीताभ्रमरगीताभिक्षुगीता सटीक-गणेशस्तुति शैवीयप्रातःकृत्यविधि-गायत्रीस्तुति-मुकुन्दमाला-कृष्णलीलास्तुति-गोविन्दाष्टक-जयनारायण-भजगोविन्द-अङ्गनामङ्गना-विचारपञ्जरिका. कृष्णजन्मस्तुति आर्तत्राण-नारायणोपनिषत् शैवीब्राह्मीविद्या. गले कलितकालिम-जटायुस्तुति-त्रिपुराशारिका-ज्वाला-राज्ञीस्तुति-सूर्यादिनवग्रहाणां पृथक् २ स्तुतिः पराप्रवेशिकाद्यात्मकः) ... ... ॥=)

१८ **भवानीसहस्रनामस्तुतिः** (सहस्रनामस्तुति-स्वाहाकारोपयोगिनी नामावली च इन्द्राक्षीसहितौ) ... ।=)

१९ **कलशस्थापनोद्धारः** (काश्मीरिकानां देवपितृक्रिययोरतीवोपयोगी) ... ... =)

२० **विष्णुसहस्रनामस्तोत्रं** (नामावलीयुतं) स्वाहाकारश्च ... ... ।=)

२१ **श्राद्धपद्धतिः** (उपयोगिश्राद्धब्राह्मणादियुता) ... ॥।)

Printed by Ramchandra Yesu Shedge, Nirnaya-sagar Press, 26-28, Kolbhat Lane, Bombay.

Published by Keshavabhatta, Patha Shala Teacher, at Rainawari, Bag-Jogi-Lankar, Srinagar, Kashmir.